नीहारः, पुं, (निह्रियते इति । नि+हृ+घञ् । उपसर्गस्य घञीति दीर्घत्वम् ।) घनीभूतशिशिरम् । तत्पर्य्यायः । अवश्यायः २ तुषारः ३ तुहिनम् ४ हिमम् ५ प्रालेयम् ६ महिका ७ । इत्यमरः । १ । ३ । १८ ॥ खजलम् ८ निशाजलम् ९ । इति त्रिकाण्डशेषः ॥ निहारः १० मिहिका ११ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । २२८ । ९ ।
"खाण्डवञ्च वनं सर्व्वं पाण्डवो बहुभिः शरैः । प्राच्छादयदमेयात्मा नीहारेणेव चन्द्रमाः ॥")
अस्य गुणः । कफवायुवर्द्धकत्वम् । इति राजवल्लभः ॥

नु, व्य, (नौति नुदति वा । नु नुद वा + यथायथं कर्त्तर्य्यादिषु मितद्र्वादित्वात् डुः ।) वितर्कः । (यथा, शाकुन्तले । १ ।
"निष्कम्पचामरशिखाश्च्युतकर्णभङ्गाः धावन्ति वर्त्मनि तरन्ति नु वाजिनस्ते ॥")
अपमानः । विकल्पः । (यथा, महाभारते । ५ । १७५ । ३ ।
"किं नु गर्हेऽम्बयात्मानमथ भीष्मं दुरासदम् ॥")
अनुनयः । अतीतः । प्रश्नः । (यथा, महाभारते । ३ । ६३ । १२ ।
"कथं नु राजंस्तृषितः क्षुधितः श्रमकर्षितः ॥")
हेतुः । अपदेशः । इति मेदिनी । अव्यये, ४१ ॥

नुः, पुं, अनुस्वारः । इति वोपदेवः । यथा,—
"नुवौ पूर्व्वेण सम्बद्धौ सन्धौ तु परगामिनौ ।"
इति दुर्गादासः ॥

नुड, शि वधे । इति कविकल्पद्रुमः ॥ (तुदां-कुटां-परं-सकं-सेट् ।) शि, नुडति अनुडीत् नुनोड । इति दुर्गादासः ॥

नुतं, त्रि, (णु ल स्तुतौ + क्तः ।) स्तुतम् । यथा,—
"तं वेदशास्त्रपरिनिष्ठितशुद्धबुद्धिं
चर्म्माम्बरं सुरमुनीन्द्रनुतं कवीन्द्रम् ।
कृष्णत्विषं कनकपिङ्गजटाकलापं
व्यासं नमामि शिरसा तिलकं मुनीनाम् ॥"
इति पुराणम् ॥

नुतिः, स्त्री, (णु + भावे क्तिन् ।) स्तुतिः । इत्यमरः । १ । ६ । ११ ॥ (यथा, भर्तृहरिः ।
"परगुणनुतिभिः स्वान् गुणान् ख्यापयन्तः ॥")
पूजा । इति शब्दरत्नावली ॥

नुत्तः, त्रि, (नुद + क्तः । "नुदविदेति ।" ८ । २ । ५६ । इति पाक्षिको नत्वाभावः ।) क्षिप्तः । प्रेरितः । इत्यमरः । ३ । १ । ८७ ॥

नुन्नः, त्रि, (नुद + क्तः । निष्ठातस्य पूर्व्वदस्य च नत्वम् ।) नुत्तः । इत्यमरः ।३।१।८७॥ (यथा, माघे । १ । २७ ।
"प्रसह्य तेजोभिरसंख्यतां गतै-
रदस्त्वया नुन्नमनुत्तमं तमः ॥")

नूतः, त्रि, नू शि स्तवने + कर्म्मणि क्तप्रत्ययः । स्तुतः । इति व्याकरणम् ॥

नूतनः, त्रि, (नव एव । "नवस्य नूरादेशो त्नप्तनप्खाश्च प्रत्यया वक्तव्याः ।" ५।४।२५। इत्यस्य वार्त्तिकोक्त्या तनप् नवस्य नूरादेशश्च ।) अपुरातनम् । तत्पर्य्यायः । प्रत्यग्रः २ अभिनवः ३ नव्यः ४ नवीनः ५ नवः ६ नूत्नः ७ । इत्यमरः । ३ । १ । ७७ ॥ सद्यस्कः ८ अजीर्णः ९ । इति हेमचन्द्रः ।६।८४ ॥ अभयः १० प्रतिनवः ११ । इति जटाधरः ॥ (यथा, रघौ । ८ । १५ ।
"प्रशमस्थितपूर्व्वपार्थिवं
कुलमभ्युद्यतनूतनेश्वरम् ॥")

नूत्नः, त्रि, (नव एव । नव + त्नप् नूरादेशश्च ।) नूतनः । इत्यमरः । ३ । १ । ७८ ॥ (यथा, ऋग्वेदे । ७ । १८ । २० ।
"न त इन्द्र सुमतयो न रायः
संचक्षे पूर्व्वा उषसो न नूत्नाः ॥"
"न नूत्ना नूतनाश्च ।" इति सायनभाष्यम् ॥")

नूदः, पुं, (नुदति रोगादीनिदमिति । नुद + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५। इति कः । पृषोदरादित्वात् दीर्घः ।) ब्रह्मदारुवृक्षः । इत्यमरः । २ । ४ । ४२ ॥ (ब्रह्मदारुशब्देऽस्य विशेषोऽस्य ज्ञातव्यः ॥)

नूनं, व्य, (नु ऊनयतीति । ऊन परिहाणे + अम् ।) तर्कः । ऊहः । यथा, ओजस्यपि खलु नूनमनूनम् । अर्थनिश्चयः । (यथा, देवीभागवते । २ । १० । ३६ ।
"स्वर्गश्च तथा प्रोक्तं ज्ञानिनां मोक्षदं तथा । न भविष्यति तन्नूनमनया देवकन्यया ॥")
अवधारणम् । यथा, नूनं हन्ति स रावणम् । इत्यमरभरतौ ॥ स्मरणम् । वाक्यपूरणम् । इति मेदिनी ॥

नूपुरं, पुं, क्ली, (नू + क्विप् । नुवि पुरति इति । पुर अग्रगमने + "इगुपधेति ।" ३ । १ । १३५। इति कः ।) स्त्रीणामङ्घ्रिपादभूषणम् । नेपुर इति भाषा । तत्पर्य्यायः । पादाङ्गदम् २ तुलाकोटिः ३ मञ्जीरः ४ हंसकः ५ पादकटकः ६ । इत्यमरः ॥ पदाङ्गदम् ७ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । ८२ । २५ ।
"नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमम् ॥"
"गुणवानपि मौखर्य्यात् पादे लुठति नूपुरः । हारस्तु मूकभावेन कान्तवक्षभतां गतः ॥"
इत्युद्भटः ॥)

नृकेशरी, [न्] पुं, (केशरः प्राशस्त्येनास्त्यस्येति इनिः । ना चासौ केशरी चेति ।) नरसिंहावतारः । इति पुराणम् ॥ (ना केशरीवेति उपमितिसमासे कृते "सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः ।" इत्यमरोक्तेः । पुरुषश्रेष्ठः ॥)

नृगः, पुं, राजविशेषः । यथा, श्रीभागवते ।
"नृगो नाम नरेन्द्रोऽहमिक्ष्वाकुतनयः प्रभो ।"
(अस्य राजप्रवरस्य कदाचिद् गोदानप्रमादजनितपापात् कृकलासत्वप्राप्तिर्वृष्णिकुमारगणानुरोधेन पुनर्भगवता वासुदेवेनोद्धारादिकथा च महाभारते । १३ । ६० । अध्यायस्य प्रथमश्लोकादारभ्य द्रष्टव्या ॥ नॄन् जीवान् गच्छति प्राप्नोति जानाति वेति व्युत्पत्त्या परमात्मा ।)

नृचक्षाः, [स्] पुं, (नॄन् चष्टे मनसैव पश्यतीति । चक्ष इ दर्शने + "सर्व्वधातुभ्योऽसुन्" उणां ४ । १८८ । इत्यसुन् । यद्वा, "चक्षेर्बहुलं शिच्च ।" उणां । ४ । २३२ । इत्यसिः । असनयोश्चेति न ख्याञादेशः ।) राक्षसः । इति हेमचन्द्रः । २ । १०१ ॥ (नॄन् चष्टे पश्यतीति नॄन् शुभाशुभकर्म्मणां चष्टे पश्यति जानातीत्यर्थः । देवः । यथा, ऋग्वेदे । १० । १०७ । ४ ।
"शतधारं वायुमर्कं स्वर्विदं
नृचक्षसस्ते अभिचक्षते हविः ॥"
"नृचक्षसः नॄणां द्रष्टॄनग्निमिन्द्रादीन् देवांश्च ।" इति भाष्यकृत्सायनः ॥ नृणां कर्म्मणेतॄणामध्वर्य्वादीनामुपद्रष्टा । यथा, ऋग्वेदे ।३।५३।९।
"असम्भात् सिन्धुमर्णवं नृचक्षाः ॥")

नृचक्षुः, [स्] पुं, (नृणां प्रकाशनानां चक्षुरिव ।) सुनीथराजपुत्रः । इति महाभारतम् ॥ (यथा, भागवते । ९ । २२ । ४१ ।
"सुनीथस्तस्य भविता नृचक्षुर्यत् सुखीनलः ॥"
विष्णुपुराणे तु । ४ । २१ । ३ ।
"तस्मादपि सुनीथः सुनीथादृचः ततो नृचक्षुः ॥")

नृत, य नर्त्ते । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-सेट् ।) य, नृत्यति नर्त्तकः । इति दुर्गादासः ॥

नृतिः, स्त्री, (नृत नर्त्तने + "इगुपधात् कित् ।" उणां ४ । ११९ । इति इन् स च कित् ।) नर्त्तनम् । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे । १० । १८ । ३ ।
"प्राञ्चो अगाम नृतये हसाय
द्राघीय आयुः प्रतरं दधानाः ॥")

नृतुः, पुं, (नृत्यतीति । नृत् + बाहुलकात् कुः ।) नर्त्तकः । इत्युणादिकोषः ॥ (यथा, ऋग्वेदे । ८ । २४ । ९ ।
"इन्द्र यथा ह्यस्ति तेऽपरीतं नृतो शवः ॥"
नृत्यत्यत्रेति । अधिकरणे कुः ।) भूमिः । दीर्घः । क्रिमिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

नृत्तं, क्ली, (नृत् + भावे क्तः ।) नृत्यम् । इत्यमरटीकायां भरतः ॥ (यथा, बृहत्संहितायाम् । ५ । ७३ ।
"नृत्तग्रहस्तप्रवराङ्गनानां
धनुष्करायतनपक्षिणाञ्च ॥")

नृत्यं, क्ली, (नृत् + "ऋदुपधाच्चाक्लृपिचृतेः ।" ३ । १ । ११० । इति क्यप् ।) तालमानरसाश्रयसविलासाङ्गविक्षेपः । नाच इति भाषा । तत्पर्य्यायः । ताण्डवम् २ नटनम् ३ नाट्यम् ४ लास्यम् ५ नर्त्तनम् ६ । इत्यमरः । १ । ७ । १० ॥ नृत्तम् ७ । उद्धतं नृत्यं ताण्डवम् । सुकुमारन्तु लास्यम् । भावाश्रयं नृत्तम् । तालल्याश्रयं नृत्यमिति भेदोऽत्र नाट्यज्ञः । इति भरतः ॥ नाटः ८ लासः ९ लास्यकम् १० नृतिः ११ इति शब्दरत्नावली ॥ * ॥ तस्य लक्षणादि यथा,—
"देवस्या प्रतीतो यस्तालमानरसाश्रयः । सविलासोऽङ्गविक्षेपो नृत्यमित्युच्यते बुधैः ॥ * ॥